नामधेयत्वे पञ्चमनिमित्तत्वखण्डनम्

डॉ राजेशः अधिकारी*

Abstract

[विध्यादिषु पञ्चविधवेदवाक्येषु नामधेयरूपवाक्यैः यागानां संज्ञाविशेषो ज्ञायते । उद्भिदा यजेत इत्यादि वाक्येषु उद्भिदादिशब्दानां कर्मनामधेयार्थं च मीमांसकैः मत्वर्थलक्षणाभयात्, वाक्यभेदभयात्, तत्प्रख्यशास्त्रात्, तद्व्यपदेशाच्चेति चत्वारि निमित्तानि स्वीकृतानि । परन्तु एतदतिरिक्तं पञ्चमं निमित्तं वर्तते न वेति विचारायोपक्रान्तोऽयं प्रबन्धः । यतो हि वैश्वदेवेन यजेत इति वाक्यविचारावसरे न्यायसुधाख्ये ग्रन्थे वैश्वदेवशब्दस्य यागनामधेयत्वाय पञ्चमस्य उत्पत्तिविशिष्टगुणबलीयस्त्वस्य निमित्तत्वं स्वीक्रियते । न्यायरत्नमालाकृत्तु न तन्मतङ्गीचकारेति कारणात् संशयो भवति किमस्य पञ्चमस्य निमित्तत्वमङ्गीकार्यं न वेति, अङ्गीक्रियते चेत् को दोषः, कस्य वाक्षेपस्य निरासाय तस्य पञ्चमनिमित्तत्वं न स्वीकार्यमिति, सर्वमेतत् विस्तारशो विचार्यते प्रकृते प्रबन्धे । अत्र चादौ प्रसिद्धस्य निमित्तचतुष्टयस्य व्याख्यानं कृतम्, तदनु उत्पत्तिविशिष्टगुणबलीयस्त्वस्य पूर्वपक्षः उत्तरपक्षः सिद्धान्तश्च युक्तिभिरुक्ताः ।]

कुञ्चिकाशब्दाः— नामधेयत्वम्, द्रव्यम्, देवता, निमित्तम्, मीमांसा ।

भूमिका

वैदिकवाक्यविचारायोपक्रान्ते मीमांसाशास्त्रे वाक्यानां विधि-मन्त्र-नामधेय-निषेध-अर्थवादभेदेन पञ्च विभागाः आलोचिताः । तत्र हि नामधेयाख्ये विभागे नामशब्दस्यार्थः संज्ञाविशेष इति, एवञ्च नामधेयाख्यपारिभाषिकशब्देन मीमांसायां यागः यागविशेषो वाभिधीयते । सम्पूर्णो हि वेदः प्रयोजनवदर्थपर्यवसायी भवति, अतश्च विधेययागादिपरिच्छेदद्वारा हि नामधेयाभिधवाक्यानाम् अर्थवत्ता । क्रियाविशेषस्य तत्सजातीय-विजातीयाभ्यां व्यावर्तनमिति नामधेयस्य प्रयोजनम् । तदुक्तं सारविवेचिन्याम्— "विधेयो यो धात्वर्थो यागादिः क्रियारूपः तत्परिच्छेदकतया इतरेभ्यो व्यवच्छेदकतयेत्यर्थः"[१] इति । तत्रैकमुदाहरणं यथा "उद्भिदा यजेत पशुकामः" इति । प्रकृते यजेत-

* सहायकाचार्यः (अतिथिः), केन्द्रीयसंस्कृतविश्वविद्यालये, जयपुरपरिसरे; Email: mail.adhikarirajesh@gmail.com

[१] सारविवेचिनी, पृ. ११७

गतलिङादिना यागविशेषस्य विधेयत्वं गम्यते, कश्चासौ यागविशेष इत्याकाङ्क्षायाम् उद्भिद्-पदसामानाधिकरण्यात् अर्थबोधकवाक्यं स्यात्— उद्भिदा यागेन पशुं भावयेदिति । एवंरूपेण उद्भिच्छब्दः यागविशेषस्य वाचको भवति । अतः उद्भिदादिशब्दानां यागनामधेयत्वे चत्वारि निमित्तानि मीमांसाशास्त्रेषु परिलक्ष्यन्ते, तानि चेत्थम्— मत्वर्थलक्षणाभयात्, वाक्यभेदभयात्, तत्प्रख्यशास्त्रात्, तद्व्यपदेशाच्च । परन्तु पञ्चममपि निमित्तं कैश्चिदाक्षिप्यते, तद्धि उत्पत्तिविशिष्टगुणबलीयस्त्वमिति । तस्य निमित्तत्वं सङ्गच्छते न वेति साम्प्रतम् आलोचयिष्यते विस्तारेण प्रकृते प्रबन्धे ।

नामधेयत्वेऽभिमतं निमित्तचतुष्टयम्

बहुभिः मीमांसकैः नामधेयस्य स्वीक्रियते निमित्तचतुष्टयम्, पञ्चमनिमित्तत्वविषयिण्याः चर्चायाः प्राक् आपाततः चत्वारि निमित्तानि आलोच्यन्ते । तानि च चत्वारि निमित्तानि—

१. मत्वर्थलक्षणाभयात् कर्मनामधेयत्वम्— उद्भिदा यजेत पशुकामः इति प्रकृतस्य उदाहरणम् । अत्र यजेत पशुकामः इत्यंशेन पशुरूपं फलमुद्दिश्य यागो विहितः, तं यागं प्रकृत्य उद्भिच्छब्दगम्यस्य खनित्रगुणस्य विधानं कृतमस्ति । एवञ्च प्रकृतवाक्यस्य अर्थद्वयं भवति— १. उद्भिदा अर्थात् खनित्रेण गुणेन यागं भावयेत्, २. यागेन च पशुरूपं फलं भावयेत् इति । अतः एकस्मात् वाक्याद् अर्थद्वयं भवति इति कारणात् वाक्यभेददोषो भवति, तथाहि फलमुद्दिश्य यागविधानमर्थश्चेत् उद्भित्पदमनर्थकं स्यात्, तथा च यागमुद्दिश्य गुणविधानञ्चेत् फलपदम् अनर्थकं भवति । तस्मात् "सोमेन यजेत" इति वाक्यवत् अत्रापि "पशुकामः उद्भिद्वता यागेन पशुं भावयेत्" इति गुणविशिष्टस्य कर्मणो विधानमस्ति । तेन च मत्वर्थलक्षणा भवति, मतोः अर्थः यस्याः, ईदृशी च असौ लक्षणा च मत्वर्थलक्षणा, सा चेयं पददोषेषु गण्यते । तस्मात् निर्दुष्टत्वसाधनाय प्रकृते उद्भिद्यागोऽयमिति उद्भित्पदं नामधेयार्थमित्यङ्गीकार्यम्[२] । वस्तुतस्तु यौगिकाः सर्वेऽपि शब्दाः मत्वर्थलक्षणाया उदाहरणं सम्भवति ।

२. वाक्यभेदभयात् कर्मनामधेयत्वम्— अत्र तु रूढाः शब्दाः उदाहरणम् । "सोमेन यजेत" इति वाक्यं यथा गुणविशिष्टकर्मणः विधायकं

[२] "अपि वा नामधेयं स्याद्यदुत्पत्तावपूर्वमविधायकत्वात्" [जैमिनीयसूत्रम् १.४.२]

भवति, तद्वत् "चित्रया यजेत पशुकामः" इति वाक्ये चित्राशब्दस्य गुणविशेषे रूढत्वात् एतद् वाक्यमपि गुणविशिष्टकर्मणो विधायकं स्यादिति आपाततः परिज्ञायते । गुणविशिष्टविधित्वे हि यागद्रव्योभयाप्राप्तेः आवश्यकत्वम् । परन्तु गुणस्य विधानं तु वाक्यान्तरेण प्राप्यते, तद्धि—"दधि मधु पयो घृतं धाना उदकं तण्डुलांस्तत्संसृष्टं प्राजापत्यम्" इति । अस्य च अर्थो भवति दध्यादिसप्तद्रव्यविशिष्टप्रजापतिदेवताकयागेनेष्टं भावयेत् इति । तस्माच्च गुणविशिष्टयागविधानमत्र न सम्भवति । यदि च "चित्रया यजेत पशुकामः" इति वाक्यात् फलमुद्दिश्य यागस्य विधानम्, यागमुद्दिश्य च गुणस्य विधानमिति यागेन सह गुणस्यापि विधानं स्वीक्रियते तर्हि वाक्यभेदो भविता । इत्थं "यागेन पशुं भावयेत्" इति "चित्रया यागं भावयेत्" इति च विधायकद्वयम् एकस्यैव विधिवाक्यस्य चेत् वाक्यभेददोषः स्यात्, स च नेष्ट इति हेतोः चित्राशब्दस्य अत्र यागनामधेयत्वम् अङ्गीक्रियते[३] ।

३. तत्प्रख्यशास्त्रात् कर्मनामधेयत्वम्— नामधेयस्वीकारे तृतीयो हेतुः भवति तत्प्रख्यशास्त्रम् । तच्छब्देन गुणस्य ग्रहणम्, तस्य प्रख्यापकं शास्त्रं हि तत्प्रख्यापकं शास्त्रम् । तस्य चोदाहरणं भवति "समिधो यजति" इति । प्रकृते समिधादिशब्दानां यदि कर्मनामधेयत्वं नाङ्गीक्रियते तर्हि समिच्छब्देन सम्यक् प्रज्वलितत्वरूपेण गुणेन विशिष्टायाः अग्निदेवतायाः बोधः स्यात्, सम्यगिन्धे इति विग्रहात् । एवंरूपेणैव 'तनूनपातं यजती'त्यत्रापि तनूनपातस्य कर्मनामधेयत्वं स्वीकार्यम् । अन्यथा तनूं न पातयति, किन्तु तनूं रक्षयतीति विग्रहात् शरीरस्य रक्षकत्वेन गुणेन अग्निदेवतैवावगम्येत । तस्मात् समिधो यजतीत्यादिशब्दात् अग्निदेवतायाः बोधे सति "समिधो अग्न आज्यस्तु वियन्तु । तनूनपादग्न आज्यस्तु वेतु" [तैत्तिरीयब्राह्मणम् ३.५.५] इत्यादयः देवताबोधिकाः श्रुतयः व्यर्थाः स्युः । अतः एभिः शब्दैः कर्मनामधेयत्वमेव अङ्गीकार्यम् ।

४. तद्व्यपदेशात् कर्मनामधेयत्वम्— जैमिनीये प्रथमाध्याये चतुर्थपादे पञ्चमाधिकरणे अयं विषयः विस्तरशः चर्चितः परिलक्ष्यते । तथाहि "श्येनेनाभिचरन् यजेत" इति प्रकृते उदाहरणम् । श्येनशब्देन यदि कर्मनामधेयत्वं नाङ्गीक्रियते तर्हि अस्य शब्दस्य प्रसिद्धम् पक्षिरूपम् अर्थमादाय श्येनगुणेन यागो विधेयः इत्यर्थः अङ्गीकार्यो भवेत् । प्रकृते हि

[३] "तत्प्रख्यं चान्यशास्त्रम्" [जैमिनीयसूत्रम् १.२.४]

सोमयागे नित्यं प्राप्यमाणं सोमं बाधित्वा पक्षिविशेषरूपं हविर्द्रव्यं गुणो विहितः । एवंरूपेण दृश्यमाने गुणविधित्वेऽपि वाक्यभेदो न भवति, तथापि अस्य श्येनशब्दस्य कर्मनामधेयतैव स्यात् । कस्मात्, तद्व्यपदेशात् । तेन व्यपदेशः अर्थात् उपमानम् । प्रकृते श्येनेन पक्षिणा व्यपदेशः सादृश्यं तस्मादित्यर्थः । अत्र श्येनपक्षी अस्ति उपमानवाचकं पदम् । उपमेयवाचकं पदन्तु "श्येनेनाभिचरन् यजेत" इत्यस्य वाक्यस्य यद्विधेयं वस्तु तत् । प्रकृते कीदृशोऽयम् अर्थवाद इति चेत् श्येनो यथा स्वाभिलषितं प्राणिनं गृह्णात्येव तथैव अयं श्येनयागोऽपि अवश्यफलदायको भवति इति उपमेयस्य स्तुतिः । एवंच प्रकृते यदि श्येनशब्देन पक्षिरूपः गुण एव यागे विधेयः स्यात् तर्हि श्येनपक्षी एव उपमेय आपद्येत, स एव च उपमानमपि स्यात् । तदा उपमानोपमेयभावः वस्तुतः न स्यात्, मुखस्य चन्द्रभिन्नत्वे सति चन्द्रगतकोमलत्वसुन्दरत्वादिधर्माणां सादृश्यवशात् उपमानोपमेयभावः सङ्गच्छते, परन्तु प्रकृते श्येनस्यैव उपमानत्वम्, तस्यैव उपमेयत्वञ्चेति न सङ्गच्छते । तस्मात् श्येनशब्देन कर्मनामधेयत्वमङ्गीकार्यम् ।

नामधेयत्वे पञ्चमनिमित्तत्वाक्षेपः

न्यायसुधाख्ये ग्रन्थे हि एतच्चतुष्टयातिरिक्तं पञ्चममपि नामधेयत्वस्य निमित्तत्वमुक्तम्, तद्धि—उत्पत्तिविशिष्टगुणबलीयस्त्वमिति । यागस्य उत्पत्तिविधिवाक्ये कथितस्य गुणस्य बलीयस्त्वमित्यर्थः । तस्माच्च विधिवाक्ये एव गुणनिर्देशात् गुणान्तरस्य तत्र निराकाङ्क्षत्वम् । यदि अनन्तरं गुणान्तरं स्यात् तद्दुर्बलम् । अतः मध्ये गुणान्तरबोधकवाक्यस्य गुणबोधकत्वं न स्वीकार्यम्, अतश्च तस्य यागनामधेयत्वं स्वीकार्यम् । तथाहि उदाहरणं "वैश्वदेवेन यजेत" इति वाक्ये वैश्वदेवशब्दस्य यागनामधेयत्वं स्वीकार्यम् । जैमिनीये प्रथमाध्याये चतुर्थपादे एकादशाधिकरणे चिन्तितमिदम् । तथाहि चातुर्मास्ययागः अत्र अङ्गीभूतः, तत्र चत्वारि पर्वाणि निर्दिष्टानि सन्ति, तानि च वैश्वदेवः, वरुणप्रघासः, साकमेधः, शुनासीरीयः इति । तत्र प्रथमे वैश्वदेवपर्वणि विधीयन्ते अष्टौ यागाः[४] । ते हि—

१. आग्नेयमष्टाकपालं निर्वपति

२. सौम्यं चरुम्

[४] तैत्तिरीयसंहिता १.८.२

३. सावित्रं द्वादशकपालम्
४. सारस्वतं चरुम्
५. पौष्णं चरुम्
६. मारुतं सप्तकपालम्
७. वैश्वदेवीमामिक्षाम्
८. द्यावापृथिव्यामेककपालम्

अष्टानां यागानामेतेषां सविधे "वैश्वदेवेन यजेत" इत्यस्य आम्नानं क्रियते । अत्र हि वैश्वदेवशब्दस्य यागनामधेयत्वमेव अङ्गीकार्यं भवति । अन्यथा विश्वदेवा देवता अस्येति योगात् पूर्वोक्तान् अष्टौ यागान् पुरस्कृत्य विश्वदेवदेवतारूपगुण एव प्रकृते विधेयः स्यात् । तन्न सम्भवति, उत्पत्तिविधावेव देवतायाः कथनात्, उत्पत्तिविशिष्टत्वात् च गुणस्य तस्य बलीयस्त्वम् । अतः वैश्वदेवशब्दस्य कर्मनामधेयत्वम् ।

मत्वर्थलक्षणाभय-वाक्यभेदभययोस्तस्य नामधेयत्वाभावः

वैश्वदेवशब्दे यदि कश्चित् मत्वर्थलक्षणाभयान्नामधेयत्वम् आक्षिपति तर्हि उत्पत्तिविशिष्टगुणबलीयस्त्वं निरर्थकं स्यात् । पुनश्च यद्यत्र वैश्वदेवशब्दो देवतामात्रमेव बोधयेत् तर्हि यागेन सामानाधिकरण्यसम्पादनाय देवताविशिष्टे लक्षणा स्यात् । परन्तु न हि तत्र तथा मत्वर्थलक्षणा युज्यते । "साऽस्य देवता" इति विग्रहे अस्येति सर्वनाम्ना एव यागस्य बोधनात् लक्षणानाश्रयणीया । उपस्थितवस्तुनः परामर्शः सर्वनाम्नां स्वभाव इति हेतोः "विश्वदेवा देवता अस्य" यागस्य स यागो वैश्वदेवः इति मुख्यार्थत्वादेव मत्वर्थलक्षणा नास्ति प्रकृते । अत्र हि विश्वदेवरूपायाः केवलायाः एकस्या एव विधानात् अन्यस्य च कस्यचित् विधेयतया अनिर्देशात् वाक्यभेदोऽपि न भवितुमर्हति ।

तत्प्रख्यशास्त्र-तद्व्यपदेशयोस्तस्य नामधेयत्वाभावः

यत्र हि विधेयः गुणः अन्यस्मात् प्राप्तो भवति तत्रैव तत्प्रख्यशास्त्रात् नामधेयत्वं भवति । यथाग्निहोत्रादिशब्दे गुणस्य प्राप्तिः अन्यस्मात् वाक्यात् । अत्र हि प्रकृता पूर्वोक्ता अष्टौ यागाः, तेषु "वैश्वदेवेन यजेत" इत्यनेन विश्वदेवदेवता विधीयते । तत्र केवलं "वैश्वदेवीमामिक्षाम्" इति सप्तमे यागे विश्वदेवदेवता प्राप्ता, नान्यत्र । तस्मात् अन्येषु सप्तसु स्थलेषु तस्याः प्राप्त्यभावात् तत्प्रख्यशास्त्रान्नामधेयत्वं नास्ति तस्य शब्दस्य । नन्वत्राक्षेपः,

सप्तमे यागे एव तर्हि वैश्वदेवशब्दस्य यागनामधेयत्वमस्तु इति। नेदं युक्तिसहम्, यतो हि "वैश्वदेवेन यजेत" इति वाक्यमस्ति अनुवादात्मकम्, तत्र च वैश्वदेव इति संज्ञाशब्दः। तस्योपयोगश्च वैश्वदेवसंज्ञकेषु यागेषु अष्टसु अपि कर्तव्यम्, न केवले सप्तमे। अत्र च उपमानोपमेयभूतस्य कस्यचित् विषयस्य अनुपलम्भात् तद्व्यपदेशोऽपि श्येनादिवत् न सम्भवति। तस्मात् प्रोक्तनिमित्तचतुष्टयानुपादेयत्वात् अत्र उत्पत्तिविशिष्टगुणबलीयस्त्वस्यैव पञ्चमस्य यागनामधेयत्वे निमित्तं स्वीकार्यम्।

उत्पत्तिविशिष्टगुणबलीयस्त्वस्य समर्थनम्

न्यायसुधाकृन्मतम्— पूर्वोक्तान् अष्टौ यागान् व्यतिरिच्य अन्यस्य कर्मणः अत्र अनुपस्थितिहेतोः यजेत इति पदेन तस्य कर्मणः अनुवादः सम्भवति। अथ यद्युच्येत "वैश्वदेवेन यजेत" इत्यत्र यजिद्वारा प्रकृतस्य यागाष्टकस्य, तद्भिन्नस्य वा कस्यचित् कर्मणोऽनुवादः न सम्भवति, अपि तु स्वतन्त्रमेव कर्मान्तरं विधीयतामिति, तदपि फल्गु। वैश्वदेवदेवताविशिष्टस्य कर्मान्तरस्य सत्त्वे गौरवदोषो भवति, "अष्टौ हवींषि"[५] इति हि "वैश्वदेवदेवेन यजेत" इत्यनेन अनूदितस्य यागस्य विषये एव उक्तम्। अतः हविरष्टकसद्भावात् तस्य यागाष्टकस्यैव अत्र अनुवादो युज्यते, देवताविशिष्टकर्मान्तरविधायकत्वम्, अप्रकृतस्य कर्मणो विधानं वा न युक्तम्। उत्पत्तिविशिष्टवाक्यैः अग्न्यादिदेवतानां यद्विधानम् आग्नेयादियागेषु, तत्र "वैश्वदेवेन यजेत" इत्यादिना विश्वदेवदेवतारूपस्य अपरस्य गुणस्य नास्ति अवकाशः। अत्र न हि विकल्पः अभ्युपगन्तव्यः, उत्पत्तिविशिष्टोत्पन्नविशिष्टयोः प्रबलदुर्बलयोः गुणयोः साम्यं नास्ति। अतः "वैश्वदेवेन यजेत" इति वाक्येन विहितस्य गुणस्य अनुपयोगः, वाक्यस्य च वैय्यर्थ्यमापद्येत। न्यायसुधाकृतः भट्टसोमेश्वरस्य मते तस्मात् अन्यथानुपपत्त्या वैश्वदेवशब्दस्य कर्मनामधेयत्वमेव अङ्गीकार्यम्। छत्रिन्यायेन च सर्वेषु आग्नेयादिष्वपि यागेषु विश्वदेवसम्बन्धः अङ्गीकार्यः।

उत्पत्तिविशिष्टगुणबलीयस्त्वस्य निरसनम्

न्यायरत्नमालाकृन्मतम्— न्यायरत्नमालाकर्तुः पार्थसारथिमिश्रस्य मते नामधेयत्वस्य कृते प्रयुक्ते वैश्वदेव-शब्दे न हि देवतार्थे प्रयुक्तः तद्धितप्रत्ययः। किं तर्हि "तस्येदम्" [अष्टाध्यायी ४.३.१२०] इति पाणिनिशास्त्रात् इदमर्थे

[५] तैत्तिरीयब्राह्मणम् १.६.३.४, तथा च मैत्रायणीसंहिता १.१०.८

प्रकृते अण्-प्रत्ययो विधीयते। तेन च वैश्वदेवशब्दस्य अर्थो भवति विश्वदेवसम्बन्धी इति, सम्बन्धत्वं चात्र यागेन। तस्मात् अनेन विग्रहेण वैश्वदेवशब्दस्य यागे देवतात्वेन कर्तृत्वेन च द्विधा सम्बन्धोऽवगम्यते। यद्यपि सप्तमे आमिक्षायागे देवतात्वेन सम्बन्धो वर्तत एव, परन्तु कर्तृत्वेन तु सर्वेषु अष्टसु यागेषु वर्तते। "यद्विश्वेदेवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वम्" [तैत्तिरीयब्राह्मणम् १.४.१०.५] इति अर्थवादवाक्यमस्ति, अनेनापि तत्प्रख्यशास्त्रात् यागाष्टकस्य विश्वदेवसम्बन्धः सिध्यति।

ननु अत्र आक्षेपः यत्, "यद्विश्वेदेवाः" इत्यादिना तत्प्रख्यशास्त्रेण विधिरेव अवगम्यते, न तु अर्थवादः इति। अत्रोच्यते, क्वचित् क्वचित् विधेः उत्पन्ना आकाङ्क्षा अर्थवादेनापि पूरिता भवति। यथा दृश्यते रात्रिसत्रविधौ फलस्याकाङ्क्षा पूरिता भवति "प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्ती" इत्यनेन। तत्प्रख्यशास्त्रशब्दस्य अत्र अन्यथापि विग्रहः सम्भवति, तद्धि तत्प्रख्यं चान्यशास्त्रमिति, प्रकृते अन्यशास्त्रपदेन अर्थवादवाक्यस्य ग्रहणं कर्तव्यम्। तथा चोदाहरणम्—"ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यत्र अर्थवादो गम्यते "तानि वा एतानि ज्योतींषि य एतस्य स्तोमाः" इति, अनेन ज्योतिःसम्बन्धम् निमित्तं कृत्वा तत्प्रख्यशास्त्रादेव नामधेयत्वं भवति। तस्मादेव वार्तिककारैरपि वैश्वदेवाधिकरणे[६] उपसंह्रियते—"तत्प्रख्यतयैव सर्वेषां नामधेयत्वम्" इति। अतः महता उद्घोषेण प्रतिष्ठापयिष्यमाणम् उत्पत्तिविशिष्टगुणबलीयस्त्वमिति युक्तेः अभ्युच्चयमात्रमेव। तस्मात् वैश्वदेवशब्दस्य अत्र तत्प्रख्यशास्त्रादेव यागनामधेयत्वमिति भावः।

प्रश्नः— ननु जैमिनीये द्वितीयेऽध्याये द्वितीयपादे षष्ठे पशुसोमाधिकरणे "सोमेन यजेत" इत्यादिवाक्यानि आलोच्यन्ते। तत्र "ऐन्द्रवायवं गृह्णाति", "मैत्रावरुणं गृह्णाति" इत्यादिवाक्यैः यागा विधीयन्ते। एवञ्च ऐन्द्रवायवादियागानां समुदायस्तत्र अनूद्यते इति पूर्वपक्षे सति सिद्धान्ते "सोमेन यजेते"त्यस्यैव यजेः निर्देशात् विधित्वं वर्ण्यते, ऐन्द्रवायवादीनां तु ग्रहणमेव, न तु यजनं विधीयते। अत्र ऐन्द्रवायवादीनां ग्रहणस्य यागसम्बन्धार्थं "सोमेन यजेत" इत्यादिवाक्यात् अनिर्दिष्टस्य यागस्य तत्र प्रकल्पना न कार्या। तस्मात् तत्र प्रकरणपाठेन वाक्यैकवाक्यतया वा ऐन्द्रवायवग्रहस्य यागेन सम्बन्धः कल्प्यते। एवमेव प्रकृतेऽपि "वैश्वदेवेन

[६] जैमिनीयसूत्रम् १.४.१३

यजेत” इति वाक्यमेव उत्पत्तिविधायकम्, न तु “वैश्वदेव्यामिक्षा” इति यजेरप्रयोगात्। अतः “वैश्वदेवेन यजेत” इत्यस्मात् यागमनूद्य “वैश्वदेव्यामिक्षा” इति आमिक्षारूपद्रव्यमात्रस्य विधानं युज्यते। तस्मादेव एकं वाक्यं यागस्य, अपरं गुणस्य विधायकं भवतीति न कस्यापि अनुवादत्वम्। अत्र आमिक्षाविधायकवाक्यं विना अन्येषु सप्तसु “वैश्वदेवेन यजेत” इति वाक्यादेव यागविधानम्, न तु वैश्वदेव्यामिक्षा इत्यत्र, विधायकवाक्यान्तरसद्भावात्। एवं वैश्वदेवेन यजेत इति वाक्यस्य उत्पत्तिविधौ अवगम्यमानत्वात् तस्य कर्मनामधेयत्वस्वीकारे तस्य अनुवादमात्रत्वकल्पनं न सिध्यति।

उत्तरम्— यागस्य हि द्रव्यं देवता चेति भवति रूपद्वयम्। “वैश्वदेवेन यजेत” इति वाक्ये हि देवतायाः निर्देशो वर्तते, “वैश्वदेवी आमिक्षा” इत्यस्मिन् वाक्ये तु द्रव्यस्य देवतायाश्चोभयोः निर्देशो दृश्यते। तस्मात् “वैश्वदेव्यामिक्षा” इत्यस्यैव उत्पत्तिविधित्वाङ्गीकारः उचित इति भाति। परन्तु तत् तदैव सम्भवेत्, यदि “वैश्वदेव्यामिक्षे”त्यत्र यजिकल्पना स्यादिति तस्यैव उपपादनं कर्तव्यम्। तथाहि “वैश्वदेव्यामिक्षा” इत्यस्मिन् वाक्ये वैश्वदेवीपदे वर्तते भागद्वयम्, तत्र प्रथमस्तु प्रकृत्यर्थः विश्वदेवदेवता, अपरश्च प्रत्ययार्थः हविर्द्रव्यविशेषः। आमिक्षा च तप्तपयसि दधिमिश्रितः घनीभूतः पदार्थः। एवं विश्वदेवः, हविः, आमिक्षा चेति त्रिषु कतमः विधेयः, कतमश्च अनूद्यः इति विचारणीयम्। “वैश्वदेवेन यजेते”ति उत्पत्तिवाक्ये विश्वदेवदेवता प्रतिपादिता, तस्या एव अनूद्यत्वम्, अप्राप्तस्य हविषश्च तत्र विधानम्। किन्तु एवमपि यज्यकल्पने सति, आमिक्षायाः यागाङ्गत्वं न स्यात्, यजिकल्पने तु इष्टं यागाङ्गत्वं सिध्यति।

पुनश्च यजेरकल्पने तु देवताम् उद्दिश्य विधीयमानः पदार्थः आमिक्षापदगम्यः उत प्रत्ययेनेत्यपि द्रष्टव्यम्। तत्र आमिक्षापदेन विधेयपदार्थविधानस्य असम्भवः समानपदश्रुतेः, प्रकृत्यर्थमुद्दिश्य प्रत्ययार्थस्य विधानेऽपि एकप्रसरतायाः भङ्गापत्तिः। एकप्रसरता हि एकस्यां वृत्तौ प्रसरः प्रवेशः ययोः द्वयोः अर्थयोः तौ पदार्थौ एकप्रसरौ भवतः। तद्भावः एकप्रसरता, तस्या भङ्गः, एकवृत्तिप्रविष्टताभाव इत्यर्थः। अतः वैश्वदेवीशब्दगतेन प्रत्ययेनैव विश्वदेवानुवादेन द्रव्यविधानं युज्यते। तस्मात् सिद्धमेतत् यत् “वैश्वदेवेन यजेते”त्यत्र उत्पत्तिविधित्वस्य अङ्गीकारेऽपि “वैश्वदेव्यामिक्षे”त्यत्र

यजिकल्पनम् आवश्यकम् । यागविधायकवाक्यमध्ये पठितस्य सर्वस्यापि वाक्यस्य यागविधिरेव, अन्यथा हि क्रमस्य भङ्गापत्तिः स्यात् । एवं "वैश्वदेवेन यजेत" इति वाक्ये उत्पत्तिविधित्वं स्वीकृतवता तत्र देवताप्रतिपादकतायाः अपि अङ्गीकार आवश्यकः ।

"आग्नेयोऽष्टाकपालः । सौम्यश्चरुः" इत्यादिवाक्यानां सत्त्वात् "वैश्वदेव्यामिक्षा" इत्यादिवाक्यानां प्रायपाठः भवति । अन्यथा हि सप्तसु यागेषु द्रव्यदेवतयोः विधानम्, आमिक्षायां तु द्रव्यमात्रविधानमिति वैरूप्यप्रसक्तिः । अपि च वैश्वदेवेन यजेत इति वाक्यस्थवैश्वदेवशब्दस्य देवतासमर्पकत्वे सति "यद्विश्वेदेवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वम्" इति वाक्यं व्यर्थमेव स्यात्, तस्माद्धेतोः वैश्वदेवशब्दः विश्वदेवकर्तृकत्वेन एव यागे प्रवृत्तः, न तु देवतासमर्पकत्वेन इति सिध्यति । आमिक्षायाः उत्पत्तिविशिष्टत्वादेव च "वाजिभ्यो वाजिनम्" इत्यादिना वाजिनद्रव्यस्य प्रवेशासम्भवः, अतश्च तस्य कृते यागान्तरविधानम् । अत्र हि कश्चिद्दोष उत्पद्यते । तथाहि वाजिशब्दस्य व्युत्पत्तिर्हि वाजः अन्नम्, आमिक्षारूपम् अस्ति येषां ते वाजिन इति । वैश्वदेवयागे स्वेच्छया कदाचित् आमिक्षा, कदाचिच्च वाजिनं द्रव्यं यदि गृह्येत, तर्हि स्यादत्र अव्यवस्थितविकल्पप्रसक्तिः । अव्यवस्थितविकल्पस्य च सन्ति अष्टौ दोषाः, तथा चोक्तम्—

प्रमाणत्वाप्रमाणत्वपरित्यागप्रकल्पने ।
प्रत्युज्जीवनहानिभ्यामष्टौ दोषाः प्रकीर्तिताः ॥ इति ॥

तत्र हि प्रमाणत्वाप्रमाणत्वयोः परित्यागप्रकल्पने इति द्वन्द्वद्वयगर्भषष्ठीतत्पुरुषसमासोऽत्र वर्तते । एवं प्रमाणत्वस्य परित्यागः, अप्रमाणत्वस्य प्रकल्पनम् इति द्वौ दोषौ । परित्यक्तस्य प्रमाणस्य प्रत्युज्जीवनम्, प्रकल्पितस्य च अप्रमाणत्वस्य हानिः इति दोषद्वयं सम्भवति । साकल्येन दोषचतुष्टयम्, तेषां च विकल्पघटके वाक्यद्वये प्रत्येकमिति अष्टौ दोषाः । तस्य च प्रकृते सङ्गतिरित्थम्—

१. आमिक्षापक्षे वाजिनवाक्यस्य प्रमाणत्वस्य परित्यागः
२. वाजिनवाक्याप्रमाणत्वस्य प्रकल्पनम्
३. वाजिनपक्षे परित्यक्तस्य आमिक्षावाक्यप्रमाणत्वस्य प्रत्युज्जीवनम्
४. वाजिनपक्षे, प्रकल्पितस्य आमिक्षावाक्याप्रमाणस्य प्रत्युज्जीवनम्
५. वाजिनपक्षे आमिक्षावाक्यप्रमाणत्वस्य परित्यागः

६. आमिक्षावाक्याप्रमाणत्वस्य प्रकल्पनम्

७. आमिक्षापक्षे परित्यक्तस्य वाजिनवाक्यप्रमाणत्वस्य प्रत्युज्जीवनम्

८. आमिक्षापक्षे प्रकल्पितस्य वाजिनवाक्याप्रमाणत्वस्य हानिः

तस्माच्च वैश्वदेव्यामिक्षा इत्यत्रैव यागविधानं युज्यते। इतरस्य तु अनुवादत्वमेव। तस्मात् वैश्वदेवशब्दस्य कर्मनामधेयत्वं सिद्धमेव, तच्च नोत्पत्तिविशिष्टगुणबलीयस्त्वरूपेण कल्पितेन पञ्चमेन निमित्तेन। एवञ्च चत्वारि एव मत्वर्थलक्षणादीनि निमित्तानि नामधेयत्वस्य इति वर्तते नामधेयत्वे तावत् पञ्चमं निमित्तमिति मतं निरस्तम्।

उपसंहारः

प्रकृतेऽस्मिन् शोधप्रबन्धे मया विस्तरशः न्यायसुधाख्यग्रन्थे स्वीकृतस्य उत्पत्तिविशिष्टगुणबलीयस्त्वस्य नामधेयत्वे निमित्तचतुष्टयातिरिक्तस्य पञ्चमस्य स्वीकारे युक्तीः उल्लिख्य तासां खण्डनं विधाय चतुर्णामेव सिद्धान्तत्वेन स्वीकारप्रकारः प्रत्यपादि। तत्सिद्ध्यै च "वैश्वदेवेन यजेत" इति वाक्यमाश्रित्य विचारितम्। तत्र केचन वैश्वदेवशब्दे नामधेयत्वम् उत्पत्तिविशिष्टगुणबलीयस्त्वात् स्वीकुर्वन्ति, यतो हि प्रसिद्धनिमित्तचतुष्टयमाश्रित्य न हि तत्र यागनामधेयत्वं स्यात् अर्थान्तरप्रसङ्गात्। तेषां क्रमोऽपि प्रकृते आलोचितः। परन्तु न्यायरत्नमालाकृतां मते तत्र न हि उत्पत्तिविशिष्टगुणबलीयस्त्वस्य स्वीकारः, अपि तु तत्प्रख्यशास्त्रादेव यागनामधेयत्वम् अङ्गीकर्तुं शक्यत इति कारणात् पञ्चमस्य निमित्तस्य नास्ति प्रतिष्ठेत्योम्।

* * *

Bibliography

1. *मीमांसान्यायप्रकाशः* (न्यायबोधिनी हिन्दीव्याख्यासहितः) ; आपोदेवः ; डॉ दयाशङ्करशास्त्री ; चौखम्बा विद्याभवन ; वाराणसी ; २०१७ ।
2. *मीमांसाकुतूहलम् ;* कमलाकरभट्टः ; श्रीपट्टाभिरामशास्त्री (सम्पादकः) ; सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ; वाराणसी ; १९८७ ।
3. *मीमांसानयमञ्जरी ;* (द्वितीयो भागः) ; श्रीपट्टाभिरामशास्त्री (सम्पादकः) ; सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ; वाराणसी ; १९९२ ।
4. *मीमांसादर्शनम् ;* जैमिनिः ; डॉ महाप्रभुलाला गोस्वामी (सम्पादकः) ; तारा प्रिन्टिं वर्क्स ; वाराणसी ; १९८४ ।

5. *जैमिनीयन्यायमाला ;* माधवाचार्यः ; मायूरम् म. रामनाथदीक्षितः (सम्पादकः) ; विद्यारण्यविद्यापीठम् ; मूम्बई ; १९८३ ।
6. *मीमांसादर्शनम् ;* मधुसूदनपेन्ना (सम्पादकः) ; न्यु भारतीय बुक कर्पोरेशन ; देहली ; २०२१ ।
7. *शाबरभाष्यम् ;* श्रीमच्छबरस्वामि ; डॉ गजाननशास्त्री मसलगाँवकर (सम्पादकः) ; चौखम्बा संस्कृत सीरीज आफिस ; वाराणसी ; २००४ ।

* * *